# संस्कृतवार्ता:

**दिनाङ्क :-10.09.2025** **प्रात: - 06:55**

## उपराष्ट्रपति-निर्वाचनम्

राष्ट्रिय प्रजतांत्रिक घटबन्धनस्य प्रत्याशी एवं महाराष्ट्रस्य राज्यपालः सी पी राधाकृष्णन् भारतस्य नूतनः उपराष्ट्रपतिःभविष्यति। सः I.N.D.I.A. घटबन्धनस्य प्रत्याशिनं तथा सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशम् बी सुदर्शन रेड्डी इत्यमुं द्वि पञ्चाशदुत्तर एकशतं मतानाम् अन्तरालेन विजितवान् । उपराष्ट्रपतिनिर्वाचनस्य मतगणनायाः अनन्तरं पत्रकारान् ज्ञापयन् राज्यसभामहासचिवः, रिटर्निंग्-अधिकारी च पी.सी.मोदी अवदत् यत्, आहत्य एकाशीत्युत्तर-सप्तशत- निर्वाचकानां मध्ये सप्तषष्ट्युत्तर-सप्तशतम् सांसदाः निर्वाचने मतदानं कृतवन्तः। राष्ट्रपति- द्रौपदी मुर्मूना, सी. पी. राधाकृष्णन-वर्याय भारतस्य उपराष्ट्रपतित्वेन निर्वाचनार्थं अभिनन्दनं कृतम् । प्रधानमन्त्री नरेन्द्र मोदी सी पी राधाकृष्णन वर्येण सह मिलित्वा उपराष्ट्रपतिपदाय निर्वाचनार्थं अभिनन्दनं कृतवान्।

## राधाकृष्णन :

उपराष्ट्रपतिपदाय निर्वाचितः सीपी राधाकृष्णनवर्येण राष्ट्रवादी विचारधारायाः विजयरूपेण, द्वितीय-उच्चतमं संवैधानिकपदं प्रति स्वस्य निर्वाचनस्य वर्णनं कृतम् । विजयानन्तरं प्रथमे सार्वजनिकभाषणे निर्वाचितः उपराष्ट्रपतिः सीपी राधाकृष्णन अवदत् यत् विपक्षघटबन्धनेन उक्तमासीत् यत् इदं निर्वाचनं, वैचारिकः युद्धः अस्ति, परन्तु मतदानानन्तरं वयं अवगच्छामः यत् राष्ट्रवादी विचारधारा विजयी उद्भूता वर्तते । राधाकृष्णनमहोदयः अवदत्, एषः प्रत्येकस्य भारतीयस्य विजयः अस्ति तथा च यदि अस्माभिः सप्तचत्वारिंशदुत्तर-द्विसहस्र-तमवर्षपर्यन्तं भारतं विकसितराष्ट्रं कर्तव्यं, तर्हि अस्माभिः सर्वैः मिलित्वा कार्यं कर्तव्यं भवति । सः अवदत् यत्, स्वस्य नूतनक्षमतायां सः राष्ट्रस्य विकासाय यथाशक्ति प्रयतते ।

## नेपाल विरोध:

नेपालस्य प्रधानमन्त्री के.पी.शर्मा ओली इत्यनेन देशे सर्वत्र व्यापकरूपेण हिंसकविरोधप्रदर्शनानन्तरं स्वपदात् त्यागपत्रं दत्तम् । ओली इत्यस्य पदत्यागं तदा अभवत् यदा शतशः प्रदर्शनकारिणः सर्वकारविरोधी घोषणानि उद्घोषयन्तः तस्य कार्यालयं प्रविष्टवन्तः। आन्दोलनकारिणः सोमवासरे विरोध-आन्दोलनेषु सम्भूत-मृत्योः उत्तरदायित्वस्य आग्रहं कुर्वन्ति स्म । अपरत्र नेपालस्य राष्ट्रपतिः रामचन्द्र-पौडेलः प्रतिकूलस्थितेः शान्तिपूर्णसमाधानं सुनिश्चेतुं आन्दोलनकारिणां नागरिकाणां तथा सर्वपक्षाणां सहकार्यं याचितवान् अस्ति। व्यापकहिंसायाः अनन्तरं अशान्तिं नियन्त्रयितुं नेपालीसेनया अपि हस्तक्षेपः कृतः वर्तते ।

## पीएम मोदी - नेपाल:

प्रधानमन्त्रिणा नरेन्द्र मोदिना नेपालदेशस्य घटनाक्रमेषु चर्चां कर्तुं सुरक्षामन्त्रिमण्डलसमितेः अध्यक्षता कृता । सोशल मीडिया संदेशे प्रधानमन्त्रिणा उक्तं यत्, नेपाले हिंसा हृदयविदारकम् अस्ति । नेपाले युवानां प्राणहानिविषये स्वस्य दुःखं प्रकटयन् प्रधानमन्त्री मोदी नेपालस्य स्थिरता, शान्तिः, समृद्धिः च सर्वाधिकमहत्त्वम् इति रेखांकितवान् । मोदीमहोदयः नेपालदेशस्य नागरिकेभ्यः अपि शान्तिसमर्थनार्थं आह्वानं कृतवान् ।

## गिरिराज-संवाद:

केन्द्रीयवस्त्रोद्यम-मन्त्रिणा गिरिराजसिंहेन उक्तं यत् भारतीय-वस्त्रेषु आत्मनिर्भरभारतस्य दृष्टिः, स्वदेशीयस्य कालातीतभावना च मूर्तरूपः भवति । श्री सिंहः नवदिल्ल्यां वस्त्र-परिधानक्षेत्रस्य सूक्ष्म-लघु-मध्यम-वस्त्रनिर्यातकैः सह परामर्शसभां सम्बोधयन् आसीत् । मन्त्री स्मरणं कृतवान्, यत् भारतस्य वस्त्रक्षेत्रस्य मूल्यं नवसप्तत्युत्तर-एकशतम् अरब-डॉलर-परिमितम् अस्ति । मन्त्री चत्वारिंशत् चिह्नितेषु वैश्विकविपणीषु सामरिकविविधीकरणस्य आवश्यकतायां बलं दत्तवान् ।

**<u>सरस-आजीविका-मेला</u>**

सरस-आजीविका-मेला इत्यस्य पञ्चमदिने ह्यः ग्रामीण-विकासस्य केन्द्रीयमन्त्री शिवराजसिंहचौहानः दिल्ली मुख्यमन्त्री रेखागुप्ता च राजधान्यां मेजर ध्यानचन्द-क्रीडाङ्गणे प्रचाल्यमानां सरस-आजीविका-मेलाम् अवलोकितवन्तौ । अस्मिन् अवसरे चौहानमहोदयेन 'सरसमेला एप्' इत्यस्य विमोचनं कृत्वा विभिन्नराज्येभ्यः लक्षपतिभगिनीभ्यः अभिनन्दनं कृतम् । एप्लिकेशन इत्येषः अनुप्रयोगः स्वसहायतासमूहानां (SHGs) महिलानां सशक्तिकरणाय निर्मितः यत्र हि ताः महिलाः, देशे सर्वत्र आयोजितेषु कस्मिन् अपि सरसमेलायां पञ्जीकरणं कर्तुं तेषां सहभागितायाः निरीक्षणं च कर्तुं समर्थाः भवेयुः।

**<u>एशिया कप- प्रथमः मैचः</u>**

एशिया कप इत्यस्य सप्तदश-तमे संस्करणस्य उद्घाटनक्रीडायां क्रिकेट्-प्रतियोगितायां अफगानिस्तान-देशेन अबुधाबी-नगरे हाङ्गकाङ्ग-विरुद्धं चतुर्णवति-धावनांकैः बृहद्-विजयं पञ्जीकृतम् । तत्र हि टीम-इण्डिया अद्य दुबई अन्तर्राष्ट्रीयक्रिकेट्-क्रीडाङ्गणे आयोजक-यूएई-विरुद्धं समूह-ए-सङ्घर्षे स्वस्य अभियानस्य आरम्भं करिष्यति ।

**।।इति वार्ता:।।**